07-08-2020

संस्कृतसामान्यम्। उपशास्त्री I

अनिवार्यपत्रम् । हितोपदेशः । श्लोक-व्याख्या ।

" तानीन्द्रियाण्यविकलानि, तदेव नाम,
सा बुद्धिरप्रतिहता, वचनं तदेव ।
अर्थोष्मणा विरहितः पुरुषः स एव,
अन्यः क्षणेन भवतीति विचित्रमेतत् ॥"

सन्दर्भः → श्लोकोऽयं श्रीनारायणपण्डितेन विरचितस्य हितोपदेशात् (मित्रलाभात्) ग्रन्थात् मूषक-परिव्राजककथात् उद्धृतोऽस्ति । हितोपदेशः नीतियुक्तायाः कथायाः संकलनमस्ति ।

प्रसङ्गः → कविरत्र मूषकमाध्यमेन धनस्य प्रभावं वर्णयति । धनवान् पुरुषः कीदृग्भवति, व्यतीतेषु धनेषु नरस्य दशा विचित्रा भवति ।

अन्वयः → अर्थोष्मणा विरहितः पुरुषः स एव (किन्तु) तानि इन्द्रियाणि अविकलानि (भवन्ति), सा अप्रतिहता बुद्धिः, तत् एव वचनम्, क्षणेन अन्यः भवति इति, एतत् विचित्रम् ।

शब्दार्थः व्याकरणञ्च → अर्थोष्मणा = वित्तोष्मणा । विरहितः = वियुक्तः । (वि+√रह्+क्त:)
पुरुषः = नरः ।
इन्द्रियाणि = शरीरस्थाः अवयवाः । अविकलानि → न विकलानि = समस्तम्, अक्षतम् । अप्रतिहता → न प्रतिहता = निर्बाधा, बाधारहिता । वचनम् = वाणी, वाक्यम् । क्षणेन = समयेन ।
इति एतत् = इदं । विचित्रम् = आश्चर्यम् ।

तात्पर्यः → वित्तरहितः पुरुषः पूर्वं (धनसत्वसमये) यथाभवत् तद्वत् धनहीनावस्थायां भवति । पूर्वसदृशं नाम, बुद्धिः, वाणी भवन्ति किन्तु विगतेषु धनेषु तस्यावस्था विचित्रा जायते इत्याश्चर्यम् ।

विशेषः → विशेषोक्तिः अलङ्कारः तल्लक्षणम् -
"सति हेतौ फलाभावे ।"

07-08-2020
डॉ० निर्मलकुमार झा, (स०प्राचार्य)
रा०उ०सं० महावि० सुखसेना, पूर्णियाँ

अनिवार्यक्रम । शास्त्री II 07-08-2020

व्याकरणशास्त्रहेतु । साहित्यम् । रघुवंशम् । श्लोकव्याख्या ।

"तस्याः प्रकामं प्रियदर्शनोऽपि न स क्षितीशो रुचये बभूव ।
शरत्प्रमृष्टाम्बुधरोपरोधः शशीव पर्याप्तकलो नलिन्याः ॥"

सन्दर्भः → प्रस्तुतमिदं पद्यं महाकविकालिदासप्रणीतस्य रघुवंशमहाकाव्यस्य षष्ठसर्गादिन्दुमतीवर्णनप्रसङ्गादुद्धृतमस्ति

प्रसङ्गः → कविरत्र प्रतीपं राजानं प्रति इन्दुमत्याः निःस्पृहभावं सोपमं प्रस्तौति ।

अन्वयः → प्रकामं प्रियदर्शनः अपि स क्षितीशः शरत्प्रमृष्टाम्बुधरोपरोधः पर्याप्तकलः शशी नलिन्याः इव तस्याः रुचये न बभूव ।

शब्दार्थः व्याकरणञ्च → प्रकामम् = अभीष्टम् । प्रियदर्शनः – प्रियं दर्शनं यस्य सः = प्रियकरः, शोभनदर्शनं अपि = च । सः = प्रतीपः नामकः राजा । क्षितीशः → क्षिति + ईशः = राजा, नृपः । शरत्प्रमृष्टाम्बुधरोपरोधः → शरदा प्रमृष्टा अम्बुधराणाम् उपरोधः = शरदृतुनिरस्तजलदावरणः । पर्याप्तकलः = पूर्णकलः । शशी = इन्दुः । नलिन्याः = कमलिन्याः । इव = यथा । तस्याः = इन्दुमत्याः । रुचये = प्रीतये । बभूव = जातः ।

तात्पर्यः → राजा प्रतीपः प्रियकरोऽपि इन्दुमत्याः तथैव सन्तोषाय न जातः यथा शरत्कालीनपूर्णचन्द्रः कमलिन्या न रोचते ।

विशेषः → अस्मिन् श्लोके शृङ्गाररसः, वैदर्भी रीतिः, प्रसादगुणः, उपमालङ्कारः, उपजातिवृत्तिश्च ।

07-08-2020

डॉ० निर्मलकुमार झा, (स० प्राचार्य)
रा० उ० सं० महावि० सुरवसेना, पूर्णियाँ ।

07-08-2020

संस्कृत सामान्यम् । उपशास्त्री II

अनिवार्यपत्रम् । कृत् प्रत्ययः । भाग-3.

1. ण्यत् प्रत्यय → ऋवर्णान्त तथा हलन्त धातुना सह अस्य प्रत्ययस्य योगः भवति । ऋवर्णस्य वृद्धिः (आर्) स्यात् । उपधायाः अकारस्य वृद्धिः (आ) भवति । यदि उपधायाम् अन्यः स्वरः भवति तदा तस्य प्रायः गुणः भवति ।

यथा → √कृ + ण्यत् = कार्यः, कार्या, कार्यम् ।

√त्यज् + ण्यत् = त्याज्यः, त्याज्या, त्याज्यम् ।

√पठ् + ण्यत् = पाठ्यः, पाठ्या, पाठ्यम् ।

सूत्रम् → "ऋहलोर्ण्यत् ।" "अचो ञ्णिति ।" → सूत्रेण अत्र वृद्धिः स्यात् ।

2. यत् प्रत्ययः → √पा + यत् = पायः, पेया, पेयम् ।

√दा + " = देयः, देया, देयम् ।

√नी + " = नेयः, नेया, नेयम् ।

√दृश् + " = दृश्यः, दृश्या, दृश्यम् ।

√श्रु + " = श्रव्यः, श्रव्या, श्रव्यम् ।

√जि + " = जेयः, जेया, जेयम् ।

प्र + √नम् + यत् = प्रणम्यः, प्रणम्या, प्रणम्यम् ।

3. क्यप् प्रत्ययः → इण्, स्तु, शास्, वृ, दृ तथा जुष् धातुभिः सह क्यप् प्रत्यये परे तुकागम ह्रस्वान्त धातुना सह । मृज् धातुना सह विकल्पेन अस्य योगः भवति ।

√स्तु + क्यप् = स्तुत्यः । √यज् + क्यप् = इज्यः ।

√वृत् + क्यप् = वृत्यः । √मृज् + क्यप् = मृज्यः ।

[signature] 07-08-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य) ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।